# शासनेषु संस्कृतकवित्वम्

Shambhu Nath Ghosh
Ph.D. scholar of Pondicherry University

पूर्वस्मिन् काले राजानो महाराजाः चक्रवर्तिनः तत्तन् महिष्यः मातरश्च तथा ततच्छासनाधीकृताः दण्डनाथादयश्च सूर्योचन्द्रोपरागसंक्रान्त्यादिपुण्यकालेषु वहुविधदानानि कृत्वा, अग्रहारादीनि च दत्वा, देवमन्दिरादीनि निर्माप्य, प्रदाय च तेषामङ्गरङ्गभोगार्थं तत्तत् विषयोपब्रह्मणानि शासनानि शिलातलेषु ताम्रपत्रेषु च लेखयामासुः। एषु शासनेषु तत्तत् राजादिनां वंशप्रसस्तयः विजयपरम्परा च वर्णयाम्बभुविरे।अनया शासनपरम्परया अस्मद्देशे चरित्रनिर्माणे अत्यन्त्यमुपकृतम्।तत्तत् प्रभुनामभिनिवेशं पुरस्कृत्य एतानि शासनानि संस्कृतभाषायां वा, तत्तत् प्रान्तीयभाषासु वा लिखितानि दरीदृश्यन्ते।कानिचित् शासनानि गद्यमयानि कानिचित् च पद्यमयानि उपलभ्यन्ते। गद्यपद्यमयानि च कानिचित् शासनानि परिमार्जितभाषामयानि, प्रोढः भावोपशोभितानि, अनल्पकल्पनाविलसितानि, काव्यकोटीमारूढानि सहृदहृदयावर्जनं कुर्वन्ति, काव्यकवीनां चरित्ररचने जागुरुकाः विद्वांसः शासनकाव्यकर्त्तुन् न स्पृशन्तीति परमविशादस्थानम्।

उपलव्धेषु शासनेषु प्राचीनतमं कुरुवंशावतांशस्य श्रीजनमेजयस्य दानपत्रं (युधिष्ठिरशके प्लवङ्गाख्ये एकोननवतिवत्सरे) त्रयोदशोत्तर त्रिंशच्छततमे ख्रीष्टपूर्ववत्सरे किष्किन्धानगर्यां लेखिते गद्यपद्यमयेस्मिन् शासने प्रारम्भश्लोकः -

**"पान्तुवो जलदश्यामाः शार्ङ्गज्याघात कर्कशाः**
**त्रैलोक्यमण्डपस्तम्भा चत्वारो हरिवाहवाः।।**[1]" इति वर्तते।

त्रैलोक्यमण्डपस्तम्भत्वमारोप्य हरिवाहूनां वर्णनं रम्यं कृतम्। अस्मिनेव शासने

**"आदित्यचन्द्रावनिलानलौच**
**द्योर्भूमिरापो हृदयंमनश्च**
**अहश्च रात्रिश्च उभे च सङ्ख्ये**
**धर्मश्य जानाति नरश्य वृत्तम् ।।**[2]"

इति महाभारते शकुन्तलोपाख्याने रचितं पद्यमुदाहृतम्।

अस्मिन् प्रसङ्गे कानिचित् कवितामयानि संस्कृतशासनानि अधिकृत्य किञ्चिदेव उच्यते।प्राचीनशासनेषु मृदुमधुरकवित्वमयं संस्कृतशिलाशासनं गिरिनगर(गिरनार्)-शासनमति प्रसिद्धम्।गिरिनगरस्य समीपे मोर्यस्य राज्ञः चन्द्रगुप्तस्य राष्ट्रीयेन वैश्येन पुष्यगुप्तेन सुदर्शनमिति अन्वर्थसङ्गकं सरोवरं निर्मितम्। यवनराजः तुषास्पः अशोकस्य मोर्यस्य कृते तं प्रनालीभिरलञ्चकार। रुद्रदाम्नः द्विसप्ततितमे वर्षे मार्गशीर्षबहुल-प्रतिपत्तिथौ सृष्ट वृष्टिना तर्जन्या पृथिवी एकार्णवी कृता।

[1] अर्ली हिस्ट्री आफ इन्डिया-(वी.ए.स्मिथ, 1924)
[2] महाभारते शकुनतलोपाख्याने

सुवर्णसिकता पलाशिनी पभृतिनां नदीनां मतीमात्रोवृत्यैः वेगैः क्रियमानानुरूप प्रतीकारोति सेतुः विभेदे। युगनिधनसद्दश घोरवेगेन वायुना प्रक्षिप्तास्म वृक्ष-गुल्म-लताप्रतानेन द्दश्यं समस्तं विभत्समयमकारि। सुदर्शनं दुर्दशनं सम्पृक्तं महा क्षत्रपेन रुद्रदाम्ना वर्षसहस्राया गोब्राह्मणहितार्थं कीर्तिवृद्धर्थं च पौरजानपदं जनमकरविष्टि प्रणयक्रियाभिः आपीड्य सस्मात् कोषात् महता धनोघ्येन अति महता च कालेन त्रिगुणद्दढतर विस्तारायामं सेतुं विधाय सुदर्शनतरं कारितम्। एतद् विषयवर्णनमस्मिन् शासने कृतम्।

अस्य कर्ता न ज्ञायते इदं प्रौढगद्यमयं शासनं वैदर्भिरीतिमनुवर्तते। त्रिचतुरपरिमिता समापकक्रियाप्रयोगेन काव्यशैल्याः परिणतदशा सूच्यते। सत्स्वपि दीर्घसमासेषु संकेतीत-सुप्रसिद्घपदप्रयोगः एव आद्दताः। वृष्टिवायुवर्णनरूपं वाक्यं सुदर्शनस्य दुर्दर्शनतां पाठकानां समक्षं चित्रं प्रसार्येव निरूपयति द्वित्राण्युपमानानि विना अस्मिन शासनकाव्ये अन्येषामर्थारलङ्काराणां समावेशौ न द्दश्यते। किन्तु कवेरस्य अनुप्रास यमकप्रियत्वं सूच्यते प्रहरण-वितरण-अर्थकामविषयाणां पतिना अविधेयानां यौधेयानाम् इत्यादि प्रयोगैः। राज्ञः रुद्रदाम्नः वर्णने **'स्फुटलघुमधुरचित्रकान्तशब्दसमोयदारालङ्कृतगद्यपद्य'** - इति यदुक्तं तेन अस्य कवेः अलङ्कारशास्त्रपरिचयः निरूप्यते। पतिना इति प्रयोगेन अस्य शव्दशास्त्रमर्मज्ञता दोत्यते।

अस्यामेव शासनशिलायां पश्चिमोत्तरतटे स्कन्दगुप्तस्य लेखो वर्तते।अयमपि सुदर्शनसरसः अतिवृष्टिघटिता तटभेदनं, तस्य च पुनर्निर्माणं वर्णयति। इदं पद्यमयं शासनं केन वा विरचितमिति न ज्ञायते। अस्य शीर्षिका 'सुदर्शनतटाकसंस्कृतग्रन्थाः' इति समाप्तिवाक्येन अवगम्यते।

यद्यप्यस्य रचयिता नाति प्रौढः कविः तथापि इदं काव्यं मृदुमधुरपदगुम्फितमेव वर्तते। उपमारूपकोत्प्रेक्षादयः परिमिताः अर्थालंकाराः यमकानुप्रासौ च शब्दालंकारौ कविना सुष्ठु प्रयुक्ताः। विविधवृत्तान्युपयुक्तानि अस्य कवेः छन्दोविचितिमपि स्फोरयन्ति। सुदर्शनसरसः तटभेदनं प्रत्यक्षीकरोति कवेर्वर्णनम्।

**"अथ क्रमेणाम्वुधकाल आगते**
**निधाघकालं प्रविदार्यतोयदैः**
**ववर्षतोयं वहुसन्ततं चिरं**
**सुदर्शनं येन विभेद चात्परात्।।[3]"**

अम्बुधकालः निधाघकालं तोयदैः प्रविदार्यागतः इति कल्पना विलक्षणा खलु?

**"समुद्रकान्ताश्चिरवन्धनोषिताः**
**पुनः पतिं शास्तोयथोचितं ययुः।।[4]"**

अनया कल्पनया नदीनां रयातिशयो यच्छते।

**"अविक्षवर्षागमजम् महोद्भ्रमम्**
**महोदधेरुर्जयत प्रियेप्सुना।**
**अनेकतिरन्तजपुष्पोशोभितो**
**नदीमयो हस्त इव प्रसारितः।।[5]"**

[3] Appendix to Epigraphia Indika (H.luders)
[4] Appendix to Epigraphia Indika (H.luders)

इदृशैः मनोज्ञैः पद्यैः अस्य कवेः रचना सुसंदब्धा मालतिमालेव सहृदयस्पृहनीया विराजते। स्कन्दगुप्तस्य वर्णनावसरे –

**"नरपतिभुजगानां मानदर्पोत्फणानां**
**प्रतिकृति गरुडाज्ञां निर्विषीं चावकर्ता।[6]"**

इति रूपकालंकारः सम्यक् उपयुक्तः।

**"तस्मिन् नृपे शासति नैव कश्चित्**
**धर्मादपेतो मनुजः प्रजासु।**
**आर्तो दरिद्रो व्यसनी कदर्यो**
**दण्डो न वा यो भृश पीडितः स्यात्।।[7]"**

इत्येतस्य पद्यस्य वाल्मीकिमहर्षिणः रामराज्यवर्णनसच्छायत्वं स्फुटम्।

सुराष्ट्रदेशे स्कन्दगुप्तस्य प्रतिनिधेः पर्णदत्तस्य पुत्रं चक्रपालितं वर्णयन् कविः-

**"तस्यात्मजोह्यत्मज भावयुक्तो**
**द्विधेव चात्मात्मनशेन नीतः।**
**सर्वात्मनात्मेव च रक्षणीयो**
**नित्यात्मवानात्मज कान्तरूपः।।[8]"**

इति श्लोके आत्मशब्दं सुमधुरं नर्तयामास।।

गद्यपद्यमयशासनेषु अत्यन्तं प्रसिद्धः हरिषेण कविनिर्मितः अलहावादशिलालेखः कविनैवेतच्छासनं काव्यमिति निर्दिष्टम्। अस्मिन् समुद्रगुप्तस्य प्रशस्तिः वैदर्भीरीतिविलसितया मधुरया रचनया सहृदयहृदयान्यावर्जयति। नवभिः श्लोकैः गद्येन च विलसितमिदं शासनं चम्पूकाव्यानामारम्भकमिव प्रतिभाति। अस्य शासनस्य समुद्रगुप्तदिग्विजयवर्णनवैपुल्येन यावती महत्ता चरित्रकाराणां तावत्येव महत्ता सहृदयानामस्य सुसज्जितेन रचनाकौशल्येन उपमारूपकयोरर्थालङ्कारोः, श्लेषानुप्रासयोश्च शब्दालङ्कारयोः सम्यक् प्रयोगः कृतः महाकविना। स्रग्धरा, शार्दूलविक्रीडितं, मन्दाक्रान्ता, शिखरिणी च पद्यभागे दृश्यन्ते। हरिषेणस्य कवेः सन्निवेशः प्रत्यक्षीकरणचणत्वस्य इदं पद्यमुदाहृतम्।–

**"आर्योहीत्युपगूह्य भावपिशुनै**
**रूक्तर्णितै रोमभिः**
**सभ्येषूच्छवसितेषु तुल्यकुलज**
**म्लानाननोद्वीक्षितः**
**स्नेह व्याकुलितेन भाष्पगुरुणा**
**तत्वेक्षिणा चक्षुषा**
**यः पित्राभिहितो निरीक्ष निखिलां**

---

[5] प्राचीन भारतीय अभिलेख,p-202
[6] प्रा.भा.अ-204
[7] पुरालिपि एवं अभिलेख(शाहनाज कुरेशी) p-141
[8] पुरालिपि एवं अभिलेख(शाहनाज कुरेशी) p-141

**पाह्येव मुर्वीमिति।।[9]"**

चन्द्रगुप्तस्य गुप्तराजस्य मरणसमये समुद्रगुप्तं भाविराजतया निर्देष्टुं समावेशिता सभापाठकसमक्षं प्रदर्शिता खलु।

समुद्रगुप्तस्य कीर्तिः सकलदिग्व्याप्ता अचिरेणैव कालनेति वर्णयन् कविः पठति-

**"प्रदान भुजविक्रम प्रशाम शास्त्र वाक्योदयै**
**र्युपर्युपरि सञ्चयोच्छ्रितमनेकमार्गं यशः।**
**पुनाति भुवनत्रयं पशुपतेर्जटान्तर्गुहा**
**निरोध परिमोक्ष श्रीध्रमिव पाण्डुगङ्गं पयः।।[10]"**

अनेन समुद्रगुप्तस्य वैरिराजेषु पशुत्वं, समुद्रगुप्ते शिवत्वं, तस्य यशसि स्वच्छतां पवित्रतामाह्लादकतां च व्यङ्ग्यामास कविः।

श्लोकरचना यावती सरलसुन्दरपदबन्धवती वचनरचना तावती ओजोगुणभूयिष्ठा दृश्यते।संस्कृतवाङ्मयसर्वस्वे दीर्घतमः समासः अनेन कविना ग्रथितः। इयत्यपि सुदीर्घसमासानन्तरं लघुसमासघटनेन च पठितृणां क्लेशलेशोऽपि न भवति, प्रत्युतानन्दो भवति। "दैवपुत्र शाहिशाहानुशाहिशकमुरुण्डैः सैहंलकादिभिः सर्वद्वीपवासिभिरात्मनिवेदनकन्योपायनदानगरुत्मदङ्क स्वविषयभुक्तिशासनयाचनाद्युपायसेवाकृतबाहुवीर्यप्रसरधरणिवन्धस्य, पृथिव्यामप्रतिरथस्य, सुचरितशतालङ्कृतानेकगुणोत्सिक्तिभिश्चरणतलप्रमृष्टान्यनरपतिकीर्तेः, साध्वसाधूदय प्रलयहेतुपुरुषस्याचिन्त्यस्य" इत्याद्यत्योदाहरणम्। अस्य कवेर्हरिषेणस्य पोषकः समुद्रगुप्तोऽपि "विद्युल्लोके विशिष्टस्फुटबहुकविताकीर्तिराज्य भुनक्ति" स्म। किन्त्वस्य सुकवेः सुबन्धुभट्टबाणसदृशस्य अन्यत् किमपि काव्यं नोपलब्धमिति परं विषादस्थानम्।

कुमारगुप्त-बन्धुवर्मणोः परिपालनकाले पट्टवायसंघेन रविमन्दिरनिर्माणं पुनरुद्धरणञ्चाधिकृत्य वत्सभट्टिनाम्ना महाकविना विरचितं मन्दसोरशिलाशासनं मधुरपदभावालङ्कृतं खण्डकाव्यमेव अस्मिन् विविधानि वृत्तानि प्रयुयुजिरे। शब्दालङ्कारेषु अनुप्रासयमकौ, अर्थालङ्कारेषु च उपमारूपकोत्प्रेक्षाः प्राचुर्येण प्रयुक्ताः।

**"तारुण्य कान्त्युपचितोऽपि सुवर्णहार**
**ताम्बुल पुष्पविधिना समलङ्कृतोऽपि**
**नारीजनः प्रिय मुपैति न तावदश्र्यां**
**यावन्नपट्टमय वस्त्रयुगानि धत्ते।।**
**स्पर्शवतावर्णान्तर,विभागचित्तेण नेत्र सुभगेन**
**यैस्सकलमिद क्षितितलमलङ्कृतं पट्टवस्त्रेण।।[11]"**

इति पद्याभ्यां तेषां पट्टवायानां कलाकौशल्यं वर्णयाम्बभूवे। दशभिः पद्यैः दशपुरवर्णनं कृतम्। भूमेः परं तिलकभूतमिदम् नगरम्। प्रफुल्लपद्माभरणानि सरांसि। अजस्रगाभिः पुराङ्गनाभिः वनानि समलङ्कृतानि। तत्र गृहाणि विमानमालासदृशानि धरां विदार्येव समुत्थितानि। तादृशं दशपुरनगरम्-

[9] अलहावादशिलालेखः
[10] अलहावादशिलालेखः,(बुलेटिन आफ बड़ौदा म्यूजियम)
[11] मन्दसोरशिलाशासनं, वत्सभट्टिः

यद्भात्यभिरम्यसरिद्वयेन चपलोर्मिणा समुपगूढं रहसि कुचशालिनीभ्यां, प्रीतिरतिभ्यां स्मराङ्गमिव।

तत्कालेऽपि अद्येववृत्तिव्यत्ययासीदिति पट्टवायसांधिकाना वर्णने स्फुरति-

**“केचित्स्वकमण्यधिकास्तधान्यै-**
**-र्विज्ञायते ज्योतिषमात्मविद्भिः।**
**अद्यापिचान्येसमरप्रगल्भाः**
**कुर्वन्त्यरीणा महितं प्रसहय।।”**

इत्यादिपद्यैः सर्वेऽपि ते “नृपतिभिः सुतवत् प्रतिमानिताः, प्रमुदितान्यवसन्त सुखं पुरे”। बन्धुवर्मणि दशपुरं शासति-

**“शिल्यवाप्तैर्धनसमुदायैः पट्टवायैरुदासं**
**श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः।।[12]”**

बहुना समतीतेन कालेन एकोदेशोऽस्य भवनस्य व्यशीर्यव, अत्युदारया श्रेण्या स्वयशोवृद्धये भूयः संस्कारितश्च।

**“शशिनेव नभोविमलंकौस्तुभमणिनेव शार्ङ्गिणो वृक्षः**
**भवनवरेण तथेदं, पुरमखिलमलङ्कृतमुदारम्।।”**

श्रेण्यादशेन एतत् शासनं वत्सभट्टिना विरचितम्। अस्यापि सुकवेः काप्यन्या रचना नोपलभ्यते।

मन्दोसोरनगर एव द्वेपद्यमये शासने वासुलेन, अन्येन च केनचित्कविना विरचिते उपलभ्यते। द्वयोरपि विष्णुवर्धनापरनाम्नः यशोधर्मणः नृपतिलकस्य प्रशस्तिः वर्तते। वासुलरचिते शासने स्रग्धरानुष्टुभौ उपयुयुजाते। उदाहरणार्थमस्य कवेरेकं पद्यं श्राव्यते-

**“स्थानोरन्यत्र येन**
**प्रणति कृपणतां प्रापितं नोत्तमाङ्गं**
**यस्याश्लिष्टो भुजाभ्यां**
**वहति हिमगिरिर्दुर्ग शब्दाभिमानम्**
**नीचैस्तेनापि यस्य**
**प्रणति भुजबलावर्णन क्लिष्ट मूर्धा**
**चूडा पुष्पोपहारै**
**र्मिहिरकुलनृपेणार्चितं पादयुग्मम्।।[13]”**

अत्र पराजितस्य प्रतिनायकस्य महत्ववर्णने नायकस्य यशोधर्मणः अत्यन्तमहत्वं व्यजितम्।

द्वितीयेशिलालेखे अज्ञाननाम्ना कविना यशोधर्मणः कालेतत्सामन्यस्य षष्टिदत्तस्य पौत्रेण दक्षेण कश्चित् कूपः खानित इति वर्णितम्। अयं कविः अनुप्रासप्रियः।उपमोत्प्रेक्षादय अर्थालङ्काराऽपि आद्दताः। किन्तु ते शब्दाडम्बरे निमग्ना इव निष्प्रभा द्दश्यते। वृत्तवैविध्यमस्य छन्दोविचितिं सूचयति। षष्टिदत्तपुत्रस्य रविकीर्तेर्वर्णनं यथा –

12 मन्दसोरशिलाशासनं, वत्सभट्टिः
13 मन्दोसोरनगरशिलालेखः, कविः- वासुलः

**"बिप्रभा शुभ्रमभ्रंशि, स्मार्तं वर्त्मोचितं सतां**
**न विसंवदिता येन, कलावपि कुलीनता।।[14]"**

अस्य कुसुममासवर्णनं यथा –

**"यस्मिन् काले कलमृदुगिरां**
**कोकिलानां प्रलापाः**
**भिन्दन्तीव स्मरशरनिभाः**
**प्रोषितानां मनांसि।**
**भृङ्गालीनां ध्वनिरनुवनं**
**भारमन्द्रश्च यस्मिन्**
**आधूतज्यं धनुरिवनद**
**च्छूयते पुष्पकोतोः।।[15]"**

द्वितीयपुलकेशिनः ऐहोलशिलालेखः चरित्रकाराणां रसज्ञानाञ्च समं कुतूहलं वितनूते। अस्य कर्ता रविकीर्तिः स्वयं जिनमन्दिरं निर्माय प्रशस्तिं रचितवान्।

**"ये नायोजिनवेऽश्म**
**स्थिरमर्थविधौ विवेकिना जिनवेश्म**
**स विजयतां रविकीर्तिः**
**कविताश्रित कालिदासभारविकीर्तिः।।[16]"**

इत्यात्मानं कालिदास भारवि तुल्यं प्रकटयामास। यद्यप्येषा अतिशयोक्तिःतथापि कविरेष प्रमुखेषु गणनीय एव । महाकविनानेन नूनमन्याऽपि ग्रन्थाः विरचिताः स्युः। किन्तु अहो! विधिविलसितम्!यदेकोऽपि नालम्भि।

अनेन महाकविना विविधैर्वृत्तैः भावानुकूलारचना सम्पादिता। कालिदासो भारविश्च अस्य अनुकार्यै महाकवी आस्ताम्। पुलकेशिवल्लभस्य दिग्विजयवर्णने रघुदिग्विजयवर्णनमस्य कवेरादर्शभूतमिति भाति।

**"अपरजलधेर्लक्ष्मीं यस्मिन् पुरीं पुरभित्प्रभे**
**मदगजघटकारैर्नावां शतै रवमृद्गति**
**जलदपटलानीकाकीर्णं नवोत्पलमेचकं**
**जलनिधिरिव व्योमव्योम्नः समोऽभवदम्बुधिः।**
**अस्य श्लोकस्य चतुर्थ चरणं रघुवंशे-**
**रजोभिः स्यन्दनोद्भूतैर्गजैश्च घनसन्निभैः**
**भुवः स्थलमिवव्योम कुर्वन् व्योमेव भूतलम्।।[17]"**

---

14 पत्तडकलशिलालेखः, (षष्ठीदत्तपुत्र)
15 पत्तडकलशिलालेखः, (षष्ठीदत्तपुत्र)
16 द्वितीयपुलकेशिनः ऐहोलशिला
17 द्वितीयपुलकेशिनः ऐहोलशिला

इत्यस्य श्लोकस्य उत्तरार्थेन सम्वदति। ईदृशानि रघुकिरातयोः साकं भावशब्दसम्बादस्थलानि बहुशो दृश्यन्तेऽस्मिन् शासन-काव्ये।

उत्प्रेक्षा दाक्षिणात्यानामिति बाणभट्टोक्तदिशाऽस्य कवेः उत्प्रेक्षाः नितरां सहृदयहृदयाह्लादिकाः यथा –

**"वरदातुङ्गतरङ्गरङ्गविलास**
**द्धस्थावली मेखलां**
**वनवासीमवमृद्गतः सुरपुर**
**प्रस्पर्थिनीं सम्पदा।**
**महता यस्य बलार्णवेन परितः**
**सम्भावितोर्वीतलम्**
**स्थलदुर्गं जलदुर्गतामिव गतं**
**तत्तत्क्षणे पश्यताम्।।**[18]"

अनेन कविना संस्कृतभाषाऽसामान्यमान्ध्रभाषा सामान्यं मत्तेभविविक्रीडितं वृत्तमुपयुक्तम्।

आन्ध्रदेशे विशिष्टतेलङ्गाणाप्रान्ते पद्यमयानि निरूपमानकविताश्रयानि शततो दृश्यन्ते। कानिचित् तेषु निरोष्ठ्यनिष्कण्ठ्यक्रियागोपनादिचित्रकवित्वरीतिभिः चक्रच्छुरिकादिबन्धकवित्वपद्धतिभिश्च समलङ्कृतानि तत्तत्कविनामखण्डपाण्डितीशौण्डतां प्रधयन्ति। तत्र तत्र दुष्टेनकालेन शिथिलितत्वात् पूर्णतया उदाहर्तुं न शक्यते, किन्तु यावल्लाम्भमुदाह्रियते। निस्तालव्यं यथा –

**"लोकप्रकाम स्वर रम्यकर्म**
**रक्ताः कला लोल मनोऽनुभावाः।।**[19]"

आक्षरमुष्टिका यथा –

**"कमलावासित तनुः, कमलावासिता तनुः**
**कमलावासि ललितं, कमलावासि लालितः।।**[20]"

क्रियापदभ्रामकं यथा –

**"ईशते कुरुते सुते, ख्याति याति विपद्यते**
**नीयतेद्योततेऽभ्येति, कीर्तयत्यधिकायते।।**[21]"

इमानि पद्यानि ईश्वरभट्टोपाध्याय विरचितात् बूदपुरशासना दुधृतानि।

**"गङ्गावक्रगतिर्विमार्ग गमना**
**सारुन्धती सर्वदा**
**भूरेषा च भुजङ्गभोगनिरता**
**सीता कुजन्मा तथा**

18 जर्नल आफ दि न्यूमिस्मेटिक सोसायटी अफ इंडिया
19 बूदपुरशासना (ईश्वरभट्टोपाध्याय)
20 बूदपुरशासना(ईश्वरभट्टोपाध्याय)
21 बूदपुरशासना(ईश्वरभट्टोपाध्याय)

**पाञ्चाली बहुवल्लभा प्रविदिता**
**जाता जडादिन्दिरा**
**निर्दोषा गुणिनी च यस्य गृहिणी**
**ता सूपमेया कया।।[22]"**

चौण्डसेनापतेः पत्नीं मैलमाम्भामधिकृत्य कियती सुन्दरकल्पना कृता अज्ञातनाम्ना शासनकविना!

अचिन्त्येन्द्रयतेरेतत्पदं श्रुणुत-

**"यस्योद्यद्विजयप्रयाण समये**
**गम्भीर भेरी भवद्**
**भाङ्कारोद्भव सम्भ्रमव्यतिकर**
**व्याजृम्भणोद्वेगतः**
**भ्रश्यन्त्यभ्रचयाश्चलन्त्यवनयो**
**भ्राम्यन्तमीभूधराः**
**कूर्मः क्राम्यति मुह्यति द्विरसनः**
**कुण्ठुति दिवकुञ्जराः! ।।[23]"**

अतिशयोक्तेः पराकाष्ठा खल्वस्मिन्ननुभूयते। मयूरभट्टः, कविचक्रवर्ती, अनन्तसूरिः, नृसिंहकविः इत्यादयो महाकवयः काकतीयराज्यकाले समुज्वलालङ्कारमयानि शासनकाव्यानि रचयामासुः।

नन्नयभट्ट, श्रीनाधादि महाकविभिः विरचितानि मृदुमधुरकविताभरितानि बहूनि शासनानि आन्ध्रदेशे दरीदृश्यन्ते। केवलमान्ध्रदेशीयशासनान्यधिकृत्यैव ग्रन्थमेकं रचितुं शक्यम्।परिमितकायेऽस्मिन् प्रसङ्गे किं स्वीक्रियते किं वा त्यज्येत अतमतिविस्तरेण।

केनचिदज्ञातनाम्ना महाकविना रचितात् शिलालेखादान्ध्रप्रशस्तिवर्णनात्मके द्वे पद्ये उदाहृत्य विरम्यते।

**"आन्ध्राः सन्ति गरीयांसः काञ्चनच्छायशालयः**
**यथा हाटकशैलस्य कटकारत्नशालिनः।**
**एकास्त्येकशिलाख्यात्र, नगरी या गरीयसी**
**सागरान्तां धरां कृत्स्नां क्रान्त्वा क्रान्त्वा निरीक्षते।।[24]"**

[22] INDIAN EPIGRAPHY,1964
[23] भारतीय पुरालिपि एवं अभिलेख
[24] शिलालेखादान्ध्रप्रशस्तिवर्णना